अव+दह—भावे घञ्। २ज्वरादिहेतुके दाहे।

**अवदाहेष्ट** न० अवदाहे ज्वरादिहेतुके देहतापे तन्निवारणाय इष्टम्। वीरणमूले उशीरे (वेणार मूल)।

**अवदाहेष्टकापथ** न० अवदाहे तन्निवारणाय इष्टकापथं सोपानमिव। वीरणमूले (खसखस्)।

**अवदीर्ण** त्रि० अव+दॄ—क्त। १द्वैधीभूते २विभक्ते च।

**अवदोह** पु० अवदुह्यते अव+दुह—कर्म्मणि घञ्। १दुग्धे त्रिका०। भावे घञ्। २दोहने आकर्षणपूर्व्वकान्तःस्थित द्रवद्रव्यनिस्सारणरूपे व्यापारे।

**अवद्य** त्रि० वद—यत् न०त०। १अधमे, २पापिनि, ३निन्द्ये, ४दोषे ५कथनायोग्ये च। "निरवद्यविद्योद्द्योतेन द्योतितः" दायभा०। "ऋष्यमूकेऽनवद्योऽस्ति" भट्टिः।

**अवद्योतन** न० अव+द्युत—णिच्—भावे ल्युट्। प्रकाशने।

**अवधातव्य** न० अव+धा—भावे—तव्य। १अवधाने "तदत्र देवेनावधातव्यम्" प्रबोधच०। कर्म्मणि तव्य। २अवधेये त्रि०

**अवधान** न० अव+धा—ल्युट्। मनोयोगविशेषे, यद्वशात् विषयान्तरतो मनोनिवर्त्तते। "अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने" कुमा० "सावधानावधारय" त०

**अवधार** पु० अव+धृ—णिच्—भावे अच्। निश्चये तदभावाप्रकारकत्वे सति तत्प्रकारके ज्ञाने "तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चय" इति भाषा०। "सर्व्वत्र यदवधारेणोच्यते स एकान्तः" सुश्रु०।

**अवधारण** न० अव+धृ—णिच्—ल्युट्। १इयत्तापरिच्छेदे, अयमित्थमेवेति विषयपरिच्छेदके २निश्चये च। संख्यादिना ३इयत्ताकरणे "यावदवधारणे" पा०। ४अन्यतोव्यावर्त्तने च।

**अवधारणीय** त्रि० अव+धृ—णिच—कर्म्मणि अनीयर्। ईदृक्तया निश्चेतुं योग्ये। "विष्णोरिवास्यानवधारणीयम्" रघु।

**अवधारित** त्रि० अव+धृ—णिच—क्त। यस्य संख्यारूपादिना निश्चयः कृतः १तस्मिन् अन्यतः कृतव्यावृत्तियुते २पदार्थे च।

**अवधार्य्य** त्रि० अव+धृ—णिच—कर्म्मणि यत्। निश्चेतुं शक्ये इदमित्थमेवेति १निर्णेये अव+धृ—णिच—ल्यप्। २निश्चित्येत्यर्थे अव्य०।

**अवधि** पु० अव+धा—कि। १सीमायां, २काले "सर्वे निदाघावधिना विशुष्काः" रघुः। "निदाघावधिना निदाघकालेन" मल्लि०। ३चित्ताभिनिवेशे च। अपादाने कि। ४अपादाने। "सेवान्तरक्रियापेक्षमवधित्वं पृथक् तयोः" भर्तृ० आधारे कि। ५बिले गर्त्ते। सीमा च द्विविधा पूर्व्वा परा च तत्र "प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयमित्यादौ" पूर्व्वा "सञ्चारोरतिमन्दिरावधीत्यादौ परा" प्रकारान्तरेण सा त्रिविधा कालकृता देशकृता बुद्धिकल्पिता च। पूर्व्वोक्ते दैशिकी। "मासावधि विमोचनामित्यादौ" पूर्व्वा "मासकालं समारभ्य जपेन्मोचावधि प्रिये" इत्यादौ परा कालिकी "सखीकर्णावधि व्याहृतमित्यादौ बुद्धिकल्पिता"। अवधित्वञ्च स्वाभिधेयापेक्षया विभागाश्रयत्वम्। तच्च पञ्चम्याऽपि बोध्यते नद्यावनमित्यादौ वनस्य नद्यपेक्षविभागाश्रयत्वात् तथात्वम्। एवं मासात् पूर्व्वं घट इत्यादौ मासतोविभागाश्रयत्वात् घटादेस्तवधिकत्वम् तत्र अयमस्मात् पूर्व्वकालवर्त्ती इत्यादौ कालिकम् अयमस्मात् पूर्व्वदेशवर्त्तीत्यादौ दैशिकं "माथुराः पाटलिपुत्रेभ्य आढ्यतरा इत्यादौ बुद्धिकल्पितम्। "स्वाभिधेयापेक्षोऽवधिनियमोऽव्यवस्थेति सि०कौ० "सञ्चारोरतिमन्दिरावधि सखीकर्णावधि व्याहृतं हासश्चाधरपल्लवावधि महामानोऽपि मौनावधि। चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितं सर्व्वं सावधि नावधिस्तु गडयाः प्रेम्णः परं केवलमित्यादौ" दैशिकं बुद्धिकल्पितञ्चावधित्वम् "सरशापावधिदां सरस्वतीम्" कुमा० इत्यत्र कालिकं "जनपदतदवध्योः" पा० इत्यत्र दैशिकम्।

**अवधिमत्** त्रि० अवधिरस्त्यस्य मतुप्। अवधिविशिष्टे अवधिमत्त्वमेव पञ्चम्यर्थ इति नव्यनैयायिकाः तेन तस्य स्वरूपसम्बन्धेन इतरपदार्थेऽन्वयः अवधित्वस्य पञ्चम्यर्थत्व स्वीकारे तु निरूपकतासम्बन्धे नान्यपदार्थेऽन्वयस्य वक्तव्यतया नञ्समभिव्याहारे च तेनैवसम्बन्धेनाभावान्वयस्याभ्युपगम्यत्वेन निरूपकतासंसर्गस्य वृत्त्यनियामकतया तत्सम्बन्धस्य प्रतियोगितानवच्छेदकतयानन्वयः वृत्तिनियामकसम्बन्धस्यैव तथात्वात्। अवधिमत्त्वस्य तदर्थत्वे तु तस्य स्वरूपसम्बन्धेनान्वयात् नञ्समभिव्याहारे अन्वयसम्भवः स्वरूपसम्बन्धस्य वृत्तिनियामकतया तस्य प्रतियोगितावच्छेदकत्वसंभवेन बाधकाभावात् "अतएव व्युत्पत्तिवादे गदाधरेण अवधित्वमवधिमत्त्वं वा पञ्चम्या अर्थ इति प्रथमपक्षेऽस्वरस सूचनाय तस्यान्ते निवेशः कृतः। "उत्तरादिभ्य एनप् स्यादवध्यवधिमतोः सामीप्ये" सि०कौ०।

**अवधीयमान** त्रि० अव+धा कर्म्मणि शानच्। यस्मिन् विषये चित्ताभिनिवेशः क्रियते तस्मिन् विषये।

**अवधीर** अवज्ञायाम् अद०चुरा० उभय०सक०सेट्। अवधीरयति ते आववधीरत् त। अवेत्यस्योपसर्गत्वे अवादिधीरत् त। अवधीरितः अवधीरी "रसैः कथा यस्य सुधावधी-